अथ चूडानिषेधकालः॥ नचूडाजन्ममेति॥ नवग्रासे बंधि दिने मांड्॥ तथा च व्यासः॥ नक्षत्रेषु

ब्राह्मणानां तावद्धमोक्षदीक्षोद्वाहमृतौ विना॥ अथ चूडानिषेधकालः॥ न चूडाजन्मनाम्नेषा
दारुणेषु च्यानौ कुजे॥ २७॥ प्रतिपद्वादूरिक्तासु॥ अथ विद्यारंभः॥ विद्यारंभो मत्रास्पते॥ वर्षे
पञ्च॥ जन्मके काले षष्ठिरिक्तौ व्यानिं कुजे॥ २८॥ न कुर्वीत यस्मिन् जातो भवेन्नरः॥ न प्रोपपद
गोःकायनि वाम्ये यतु नारतः॥ दारुणेषु तु सर्वेषु दुहृतारं तु वर्जयेत्॥ वारे शानैश्चरादित्य भौमानां
रात्रिमेव च॥ तथा प्रतिपदं रिक्तां मष्टौ चैव वर्जयेदिति॥ २७॥ अथ विद्यारंभः॥ विद्येति॥ तथा
च मार्कंडेयः॥ प्राप्तेथ पंचमे वर्षे अप्रसुप्ते जनार्दने॥ षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाष्टमीं॥
रिक्तां॥

पंचदशीं चैव सौरे भौमदिने तथा॥ एवं सुनिश्चिते काले विद्यारंभं तु कारयेत्॥ पूजयित्वा हरिं ल
क्ष्मीं देवीं चैव सरस्वतीं॥ स्वविद्यासूत्रकारांश्च सुविद्यां च विद्यां च विशेषत इति॥ २८॥ अथोपनयन
कालः॥ वसुरुद्रेति॥ वर्षसंख्या च गर्भात् अभिप्रायेण पित्रेयाः॥ याशब्दो नित्यक्रमः॥ स च स्ववेदपेरत्न नंतरे
योज्यः॥ यजुःसामाथर्ववेदिनामनुक्रमादेषु वारेषु व्रतबंधरस्त्यर्थः॥ तथा चापस्तंबः॥ गर्भाष्टमे
ब्राह्मणं गर्भैकादशे राजन्यं गर्भद्वादशे वैश्यं विप्रस्यामित्र यात वल्क्यो॥ गर्भादष्टमेष्टमेवाब्दे

अनध्यायान्विना नत्वादेवं गंधपल्लवं गुरुं॥ ॥ अथोपनयनकालः॥ ॥ वसुरुद्रार्कवर्षे पु ब्रह्म
क्षत्रविशां क्रमात्॥ २९॥ ।
ब्राह्मणस्योपनायनं॥ राजामेकादशे सैके विशामेकेय
थाकुलमिति॥ अयं च मुख्यः कालः॥ कामतस्त्व अंगिरा उक्तं॥ ब्रह्मवर्चसकामस्य पंचमे क्षेप
जन्मनः॥ आयुःकामस्य नवमे कार्यं च मौंजीबंधनं॥ मनुः॥ राज्ञो बलार्थिनः षष्ठे वैश्यस्ये
हार्थिनोष्टम इत्यादि॥ अनावश्यकत्वाद यं कालो नोक्त इति सेयं॥ मासादीनि तु ज्योतिः

का॰नि॰ न्नाख्ये॥ माघादिषु च मासेषु मौंजी पंच सुराख्यते॥ हस्तत्रये पुष्यधनिष्ठयोश्च पौष्णाश्विसौम्यादि
१३३ तिविष्णुभेषु॥ त्राख्येति पौर्वांचंद्र बलेन युक्ते कार्या द्विजानां व्रतबंधमोक्षौ॥ गुरुभृगुसुतौ धात्रीर
सुतः त्रात्राधरात्मजः॥ सुरेते साम पर्वणा वा राज्ञामधिपाः क्रमात॥ शाखाधिपो बलेनिके न्द्र
गते तु मौंजीबंधस्तदीये दिवसे पञ्शुभाप्लक्षः॥ अस्मिन् बलेनाहितेतु पुनर्द्विजानां साद्ध

माघादि पंच तु हरि द्वयार्कत्रय पुष्य ते॥ मृगाश्वि योह्यादितिनेत्र्युने वा रेतिपौतथा॥ २३॥
मोदये गुरुसितमौमे घनुक मात्॥ व्रतबंधोन तुन्ये ष्टेन्त्रे ष्टा पस्य स्य किंचन॥ २३॥

णसंकारः इति प्रवदंति नित्ताः इति॥ २३०॥ व्रतबंध इति॥ ॥नन्विति॥ तथा च वृद्ध त्राते॥ नज
न्मधिष्ण्ये न च जन्ममासि न जन्मकाले यदि ने विद ध्यात्॥ ज्येष्ठेन मासि प्रथमस्य सूनोस्त
थासुताया अपि मंगलानीति॥ २३१॥ ॥मृगादि इति॥ नेति पूर्वेण संबध्यते॥ तथा च स्त्रं कोशे॥ रा॰म॰
नष्टे चंद्रे खलगे शुक्रे निरंशे वै भास्करे॥ कर्त्तव्यं चोपनयनं नानध्याये गलग्रहे॥ इति॥ १३३

राज्ञः प्रथमभागस्थितः सूर्यो निरंशः॥ ३२॥ ॥गलग्रहान् पठति॥ त्रयोदश्यादि स्मृतं॥ ३३॥
अथोपनयने गौणकालः॥ गौण इति॥ अविधौ आष्टाद्विपक्षोद्वाविंशतिः॥ पुष्पद्विकं च
तुर्विंशतिः॥ तथा च मनुः॥ आषोडशात् ब्राह्मणस्य सावित्री नातिवर्तते॥ आद्वाविंशात् क्षत्रबं

जन्मनो दिवसे मासे भृगावस्तं गते रवौ॥ निरंशोऽस्तमिते चंद्रेनध्यायेषु गलग्रहे॥ ३२॥ त्रयो
दश्यां चतुष्कं च सप्तम्यादि त्रयं तथा॥ चतुर्थ्येकाकिनी प्रोक्ता अष्टावेते गलग्रहाः॥ ३३॥
थोपनयने गौणकालः॥ ॥गौण आषोडशाद् षड्द्विपक्षान् वृषु गद्विकान्॥ ॥अथान
ध्यायाः॥ ॥चतुर्दश्यष्टमी पर्व प्रतिपन्न्वष्टकासु च॥ ३४॥ घोरम् चतुर्विंशाते विंशा इति॥ अ
थानध्यायाः॥ ॥चतुर्दशीति॥ हि स्पष्टार्थी॥ ततश्च स्पष्टाः सर्वलोकप्रसिद्धाः अनध्यायाः
॥अप्रोक्ता नाम प्रसिद्धा इति भावः॥ तथा च हारीतः॥ प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणो द्व
यं॥ श्वोनध्याये द्यशर्वर्यां नाधीयीत कदाचनेति॥ मनुः॥ ॥अमावास्या गुरुं हंति शिष्यं ह

का॰नि॰ तिचतुर्दशी॥ब्रह्माष्टकापौर्णमास्योतस्मात्ताःपरिवर्जयेत्॥नारदीये॥अयनेविषुवेचैवशया-
१३४ नेबोधनेहरेः॥अनध्यायस्तुकर्तव्यायावसोपपदातिथिः॥पुराणे॥युगादिषुचसर्वासु
थामन्वंतरादिषु॥अनध्यायंप्रकुर्वीततथासोपपदातिथिः॥वसिष्ठः॥फलान्यपस्तिलान्भ
क्ष्यानमवानपश्चाद्विकंभवेत्॥प्रतिगृह्याप्यनध्यायःपुण्यार्थाब्राह्मणास्मृताः॥२२५॥श्रोतु

अनध्यायाद्यदिवसेरात्रौसोपपदासुच॥विषुवायनमन्वादियुगादिषुमृतेद्विजे॥२२५॥श्रा
यमुक्तौहरेःस्वापबोधनेध्ययनंनहि॥वर्षासुगर्जनेप्रातःसंध्यायांदिवसेतथा॥२६॥

निवर्षास्विति॥अहोरात्रमिति॥वर्षासुवर्षाकालेप्रातःसंध्यायांगर्जनेदिवा॥तथा॥अध्यय
ननकार्यं॥सायंकालेगर्जनेरात्रौतथाध्ययनंनकार्यं॥वर्षाभ्योन्यत्रअकालेगर्जनेअहो
न रात्रेध्ययनंकार्यमित्यर्थः॥तथाचमनुः॥प्रादुष्कृतेष्वग्निषुतुविद्युतस्तनितनिःस्वनेसज्यो राम॰
तिःस्यादनध्यायः॥शेषरात्रौयथादिवेति॥प्रादुष्कृतेष्वग्निमनेनसंध्यादयंलक्ष्यते॥प्रातःसं १३४

ध्यायांनिमित्तोत्पादेसज्योतिःपर्वयस्यांसमयस्तावदेवानध्यायः॥दिवेत्यर्थः॥अपरस्यांतु
यावन्नक्षत्राणितावदेवंरात्राविलर्थः॥शेषेकृतौयथादिवानध्यायस्तथारात्रावपिहो
रात्रमित्यर्थः॥अन्यदपिवीक्ष्यंमूले॥इति॥अयमत्रचतुर्थीप्रदोषमात्राद्यंतरागमनादिमू
लेकालनिर्णयेविलोक्यं॥अदुर्धियांअमतानां॥तथाचोक्तं॥चतुर्दश्यष्टमीपर्वप्रतिपत्से

सायंकालेतथारात्रौवर्षाभ्योन्यत्रगर्जने॥अहोरात्रेअन्यदपिविक्ष्यंमूलेपदुर्धियां॥२७॥
अथाष्टकाःसंगृह्णाति॥मार्गमार्गचतुष्केषुःकृष्णेभानुत्रयेष्टकाः॥आश्विनेदशमी
शुक्लाद्वितीयाज्यैष्ठमासके॥२८॥॥छ॥चतुर्थीद्वादशीमाघेएताःसोपपदाःस्मृताः॥॥

वसवदा॥दुर्मेधसामनध्यायस्त्वंतरागमनेषुचेति॥२७॥॥अथाष्टकाःसंगृह्णाति॥
मार्गेति॥मानुत्रयेसप्तम्यादित्रये॥तथाचकालनिर्णयकारैरुक्तं॥अष्टकाकर्मांगभू
तंसप्तम्यादित्रिरात्रमुपलक्ष्यतेइति॥आश्विनेदशमीशुक्लेति॥स्पष्टार्थः॥२९॥॥छ॥

का॰नि॰ १३५ युगादिमन्वादयः॥ पूर्वोक्ता अपि सुखग्रहणार्थं संग्रहवाक्यद्वयेनोच्यंते॥ तृतीया माधवे शु
क्लेति॥ ३९॥ ॥कृष्णा नभस्ये माघे मो— सादेते युगादयः॥ ॥अथ मन्वादयः॥ ॥ ॥तिथ्यग्नी
ि॥ मधोरिति स्याज्ज्येष्ठे पंचमी॥ मधुमारभ्य तिथ्यादिनिर्दिदशानिःपदैर्दिदशामासानां मन्वा
दयोस्तेषाः॥ तिथिः पूर्णिमा॥ अग्निस्तृतीया चैत्रे न वैशाखे॥ मन्वादिर्नास्तीत्यर्थः॥ पूर्णि

तृतीया माधवे शुक्ला नवमूर्जे नियो दशी॥ ३९॥ कृष्णा नभस्ये माघे मा कृतादेते युगादयः॥
अथ मन्वादयः॥ ॥तिथ्यग्नीनतिथिस्तिथ्यांत्रोक्तस्मे नो नलोग्नहाः॥ ४०॥ तिथ्यकौ निक्षिवो
श्वो मा तिथि मन्वादयो मधोः॥ ४१॥ माज्येष्ठे॥ तिथ्याद्यो पूर्णिमा दशम्यो॥ आषाढे॥ कृष्णे
भः कृष्णाष्टमी श्रावणे॥ अनलस्तृतीया भाद्रपदे॥ नहो नवमी आश्विने॥ तिथ्यर्कौ पूर्णि
माद्वादशी कार्त्तिके॥ न मार्गे मन्वादिर्नास्ति॥ शिव एकादशी पुष्ये॥ अश्वः सप्तमी माघे॥ अ राम॰
मा तिथी दर्शपूर्णिमे फाल्गुने॥ मन्त्रकृत्यत्राष्टाभिर्निनतश्चतिरिक्तार्थं इत्यर्थः॥ मूलवाक्यानि तन्त्र॥ १३५

प्रकरणविवरणे पठितानीति ज्ञेयं॥ ४२॥ ॥अथ गोदानिकं॥ ॥गोदानेति॥ गोणाख्या सोपना
यनकालश्चतस्मिन्॥ ब्रह्मक्षत्रविशां क्रमेण षोडशद्वाविंशचतुर्विंशवर्षे गोदानिका क्रिया के
शांतकर्मकार्यमित्यर्थः॥ तथा च मनुः॥ केशांतः षोडशे वर्षे ब्राह्मणस्य विधीयते॥ राज
न्यबंधोर्द्वाविंशे वैश्यस्याधिके ततः इति॥ ॥अथ ब्रह्मचर्यविधिः॥ ॥प्रतिवेदमिति॥ प्रतिवे

अथ गोदानिकं॥ ॥गौणोपनयनप्रोक्तकाले गोदानिका क्रिया॥ ॥अथ ब्रह्मचर्यविधिः॥
प्रतिवेदं ब्रह्मचर्यं वर्षाणि द्वादशाथवा॥ ४३॥ ॥
दं वेदं वेदं प्रति॥ द्वादशाब्दानां विकल्पः॥ अ
थवा शाखान्तं शक्तियोतकनत्रैवविकल्पार्थं वा शब्दः॥ ततश्च एकस्मिन् वेदे द्वादशवर्षाणि ब्र
ह्मचर्यं॥ अथवा त्र्यक्षौ षट्त्रिंशाणि ग्रहणांतं वा वेदग्रहणं यावता कालेन भवति॥ तावत्पर्यं
तं॥ इच्छं प्रतिवेदं ब्रह्मचर्यमित्यर्थः॥ तथा च मनुः॥ षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतं
॥ तदर्धिकं पादिकं वा ग्रहणांतिकमेव चेति॥ त्रैविद्यं कं ग्रहणं तु सामारभ्य वेदत्रयविषयं

 षट्त्रिंशदाब्दिकं प्रतिवेदं द्वादश॥ तदर्द्धं पादिकं त्रीणि इति योजना॥ ४२॥ ॥अथ समाव
 र्त्तनं॥ ॥विद्येति॥ चतुर्विंशतिमतेन च व्रतस्नानविद्याव्रतस्नाने सूचिते॥ सन्निधौ॥ ज्योतिःशा
स्त्रेण तथा चत्वारितः॥ त्रयः स्नातका भवंति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति
॥ समाप्य वेदं समाप्य व्रतानि समावर्त्तते विद्यास्नातकः॥ यः समाप्य व्रतान्यसमाप्य वेदं
षट्त्रीणि गृह्णन्तं वा॥ ॥अथ समावर्त्तनं॥ ॥विद्यास्नानं तु सन्निधौ॥ गुरवे दक्षिणां दत्वा
साङ्गं वेदं समाप्य च॥ ४३॥ ॥अथाश्रमकालः॥ ॥ब्रह्मचारी गृही वानप्रस्थो भिक्षुरनुक्रमा
स व्रतस्नातकः यः पुनरुभयं समाप्य स विद्याव्रतस्नातक इति॥ याज्ञवल्क्योऽपि॥ गुरवे तु व
रं दत्वा स्नायात तदनुज्ञया॥ वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वेति॥ वेदसमापनं तु साङ्गमु
च्यते तथा च व्यासः॥ यथायश्रुतिर्हारीतः तत्र स्थलमतिपूलं॥ द्विजस्तथा पाठमात्रितो न वेदफल
मश्नुते इति॥ ४२॥ ॥अथाश्रमकालः॥ ॥तत्र राज्ञापेक्षया चतुर्णामाश्रमाणां समुच्चयो विक

ल्पश्च तत्र समुच्चयपक्षमाह॥ ब्रह्मचारीति॥ समर्थस्य चतुर्णां समये त्वाक्रमः॥ तथा च मनुः
॥ चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः॥ द्वितीयमायुषो भागं कृतदारो गृहे वसेत्॥ वनेषु
तु वसेदेवं तृतीयं भागमायुषः॥ चतुर्थमायुषो भागं त्यक्त्वा संगान् परित्यजेत् इति॥ क्रमादि
ति पदं प्रातिलोम्यवारणाय॥ तथा च दक्षः॥ त्रयाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यते॥
प्रातिलोम्येन यो याति तस्मात्पापकृत्तमः इति॥ त्रयाणां गृहस्थवनस्थयतीनां॥ त्रया

॥ चतुर्थायुर्विभागेषु समर्थः स्यात्त्वपेक्षया॥ ४४॥ ॥

णां द्वयोर्वा समुच्चयमाह॥ अन्यपेक्षयेति॥ अन्यथा चतुर्णां समसमुच्चये अशक्तस्य॥ जाबा
लिस्मृतावीच्छया॥ आश्रमस्वीकार इत्यर्थः॥ तथा च स्मृतिः॥ ब्रह्मचर्यं समाप्य गृही भवेत्
गृही भूत्वा वनी भवेत्॥ वनी भूत्वा प्रव्रजेत् इतरथा ब्रह्मचर्यादेव प्रव्रजेत॥ यद्वा वनाद्वेति॥
गृही वा वनाद्वेति॥ समुच्चयमयमाह॥ एक एव तस्य वेदेति एक एवाश्रमो भवेदित्यर्थः॥॥

का॰नि॰ तथा च भविष्यत्पुराणे ॥ गार्हस्थ्यमिच्छन्नृपाल कुर्याद्दारोपसंग्रहं ॥ ब्रह्मचर्येण वा कालं न
१३७ येत् संकल्पपूर्वकं ॥ वैखानसो वापि भवेत् परिव्राडिच्छया न वेदिति ॥ २५५ ॥ ॥ अथ विवाहः ॥
अथ वेदमिति ॥ गुणैः समां कन्यामुद्वहेत् ॥ तथा च बृहस्पतिः ॥ वेदानधीत्य विधिना समावृत्तो
ऽकृतव्रतः ॥ समानामुद्वहेत्पत्नीं यत्नाः शीलवयोगुणैरिति ॥ विधिना समावृत्तः गुरवे दक्षिणां

अथ विवाहः ॥ ॥ अथ वेदमभ्यस्य दक्षिणां प्रदाय गुरवे कन्यां लक्षण्यामुद्वहेत्समां ॥ ५५ ॥
गुरोर्मध्ये द्वये माघे राधे ज्येष्ठे शुभे दिने ॥ मूलत्र्यात्तमघापौष्णश्रुत्तरार्कमैत्रभे ॥ ५६ ॥ ॥

हस्तेन्दर्षे ॥ ५७ ॥ मघेति ॥ राधा विशाखा ॥ एषु मासेषूद्वहेदिति पूर्वेणान्वयः ॥ तथा च व्या
सः ॥ माघे मासे न वैधूढा कन्या सौभाग्यसंयुता ॥ फाल्गुनोढा न वैस्त्री ध्वी वैशाखे पुत्रिणी ॥ राम॰
भवेत् ॥ धर्मयुक्ता भवेज्ज्येष्ठे धनिनी कार्त्तिके भवेत् ॥ देवपूजारता नित्यं मासे स्यात् सौमदैव १३७
ते इति ॥ विवाहमपि नेच्छंति प्रसुप्ते शार्ङ्गधन्वनीति ॥ चैस्पतत्ति वैधत्वात् कार्त्तिके नोक्त इति
वः ॥

शुभे दिने इति विष्टयादिदोषरहिते तिथौ सद्वारे चेति ॥ मूले इति पूर्वेणान्वयः ॥ तथा चोक्तं ॥ हस्तोत्त
राणि वायव्यं मैत्रं मूलं च रेवती ॥ रोहिणी सौम्यपित्र्यं च श्रुभं पाणिग्रहे सदेति ॥ २५८ ॥ ॥ स्वस्थे
दवेनतु गुरौ वेति ॥ गुरौ सिंहगते नीचगते रवौ धनुर्मीनगते न च ॥ शुक्रे गुरौ अस्तमिते त
था अधिके मासि यात्राबंधने चव्रतबंधो न च न कुर्यात् ॥ चकारात्कन्योद्वाहे यद्विमर्थः

स्वात्पेदं वेनतु गुरौ सिंहगे नीचगे रवौ ॥ धनुर्मीनगते शुक्रे गुरावस्तमिते ऽधिके ॥ २५७ ॥ ॥

तथा चाहुः ॥ रविक्षेत्रगते जीवे जीवक्षेत्रगते रवौ ॥ वर्जयेत्सर्वकर्माणि व्रतस्वस्त्ययनादिक
॥ तथा वसिष्ठः ॥ विवाहे व्रतबंधे च यात्रायां गृहकर्मणि ॥ गुरावस्तमिते शुक्रे ध्रुवं मृत्युर्वि
निर्दिशेत् ॥ तथा च वात्स्यः ॥ सिंहस्थिते सुरगुरावधिमासके च जन्मेष्टनयाद्यतनयस्य तथा
वमेव ॥ कुर्वीत नार्कगतनीचगयोर्विलग्ने जन्मेशयोश्च निखिलान्यपि मंगलानीति ॥ २५९ ॥

गुरुशुक्रयोर्बालत्वं वृद्धत्वं चाह॥ गुरुशुक्राविति॥ प्राक् पूर्वं दिशि॥ तथा चोक्तं॥ पश्चादभ्युदि
तो बालो दशाहं प्राग्दिनत्रयं॥ पक्षं वृद्धस्तु पूर्वेण पंचापंचाहं पश्चिमे सित इति॥ सितः शुक्रः॥ एत
द्गुरोरप्युपलक्षणं॥ ४८॥ ॥ ॥उक्तादन्यत् विवाहादौपयोगिलग्नमध्यादिकं कालनिर्णयं वि
लोक्यमित्याह॥ अखिलं मूलेसेपमिति॥ अथ विवाहासंबंधिकर्मकालः॥ ॥अथेति॥

गुरुशुक्रौ तु पश्चिमे तु दितौ बालसंज्ञौ नोदन्गाहं प्राग्दिनत्रये॥ ४९॥ वृद्धौ तु पक्षमें द्व्यंतो पं
चाहं पश्चिमे सितः॥ मूलेसे यं॥ ॥अथ विवाहकर्मकालः॥ ॥अथोद्वाहसंबंधिदलनामि
कं॥ ४९॥ ऋक्षे वैवाहिके कुर्यात्॥ परिणयकन्याकालः॥ वृषली तु पितुर्गेहे रजः पश्यत
न्दृष्यपानस्वामी ब्रह्मतामवेत्॥ ५०॥ ॥
तथा च वास्पः॥ कंडनदलनं यवारकमंडप
मृक्षे द्विवर्णवाद्यखिलं॥ तत्संबंधिगतागतमृक्षे वैवाहिके कुर्यादिति॥ ४९॥ ॥अथ पपरि
णयकन्याकालः॥ तत्र परिणयामातः॥ वृषलीति॥ तत्स्वामी पिता भर्ता वा॥ तत्र वृहस्पतिः॥

पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता॥ भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता॥ त
था॥ वृषलीसंगहीता यो ब्राह्मणो मदमोहितः॥ सततं सूतकं तस्य ब्रह्महत्या दिने दिने इति॥
२५०॥ ॥अथ परिणेयकन्याविषये विष्णुपुराणं पठति॥ वर्षैरिति॥ ॥अथ देयकन्याकालः॥
देया गौरीति॥ चतुर्थाद्वादशाब्दात्॥ तथा च संवर्तः॥ अष्टमे तु भवेद्गौरी नवमे नग्निका भवेत्

वर्षैरेकगुणां भार्यामुद्वहेत् त्रिगुणः स्वयं॥ ॥अथ देयकन्याकालः॥ ॥देया गौर्यष्टवर्षा
या नवाब्दा नग्निका तथा॥ ५१॥ दशाब्दा कन्यका तदूर्ध्वं रजस्वला वृषलीमतेति॥ ॥अथ स्वयं
वरकालः॥ ॥पिता पितामहो भ्राता माता बंधुर्यदा न हि॥ ५२॥ ॥ ॥

दशमे कन्यका प्रोक्ता द्वादशे वृषली स्मृतेति॥ २५१॥ ॥अथ स्वयंवरकालः॥ ॥
पिता पितामह इति॥ बंधुः पितृबंधुर्मातृबंधुश्च॥ हि हेतौ॥ स च मध्यप्रदीपिकायां पेन द
यो रपि संबध्यते॥ ततश्च पित्रादिनामभावः स्वयंवरकाले एकः॥ पित्रादिभावे पितृ तु कालाधर्य

त्रयानंतरं दिनीयः॥ तथाच याज्ञवल्क्यः॥ गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरमिति॥ ग
गम्यं गमनार्हं स्वयंवरमेव कुर्यादित्यर्थः॥ बौधायनोप्याह॥ वर्षाणि त्रीण्यृतुमती कांक्षेत
पितृशासनं॥ ततश्चतुर्थे वर्षे तु विंदेत सदृशं पतिमिति॥ २५२॥ ॥अथ चतुर्थाश्रमस्वीकारः
वैराग्ये इति॥ अयं भावः॥ आश्रमादाश्रमं गच्छेद्धुतहोमो जितेंद्रियः॥ भिक्षाबलिपरिश्रांतः प्र

ऋतौ वर्षत्रयादूर्ध्वं कन्या कुर्यात्स्वयंवरं॥ ॥अथ चतुर्थाश्रमस्वीकारः॥ ॥वैराग्ये सति सं
न्यासो नानुपूर्व्याश्रमक्रमः॥ २५३॥

व्रजेत्प्रेत्य वर्द्धते॥ परिव्रज्याफलं प्राप्नोतीत्यर्थः॥ इत्यादीनि
वाक्यानि समुच्चयपक्षमात्रपरकाणि॥ तथा॥ अनधीत्य द्विजो वेदाननुत्पाद्य तथात्मजान्॥
अनिष्ट्वा चैव यज्ञैश्च मोक्षमिच्छन्व्रजत्यधः इति॥ इत्यादीनि वचनानि समुच्चयपक्षमाश्रि
त्य तत्पक्षनिंदापराणि न पुनः प्रतिषेधकानि॥ अन्यथा ब्रह्मचर्यादेव प्रव्रजेदिति जाबालि
श्रुतिविरोधः स्यात्॥ ततश्च॥ यदा मनसि वैराग्यं जायते सर्ववस्तुषु॥ तदैव संन्यसेद्विद्वान्
अन्यथा पतितो भवेत्॥

इत्यादि सौरपुराणादिवाक्यबलात् वैराग्यमेव संन्यासे कारणमिति॥ २५३॥ ॥॥अथाग्नि
होत्रस्वीकारकालः॥ ॥मूलादीनि॥ यः सोदर्ये कोदरे अधिकारिणि अग्नने सति दाराग्निहोत्रं करोति॥
स परिवेत्ता भवति॥ अग्रजानुज्ञया तु न दोषः स्यात्॥ अधिकारी स्यादित्यर्थः॥ तथाच भनुशा
तातपः॥ दाराग्निहोत्रसंयोगं कुरुते योग्रजे स्थिते॥ परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः इति॥

अथाग्निहोत्रस्वीकारकालः॥ ॥मूलादिदोषरहिते सोदर्ये योधिकारि
णि॥ दाराग्निहोत्रसंयोगं पारिवेत्ता करोति सः॥ ॥२५४॥ ॥छ॥

अयं च दोषे मूकत्वादिदुष्टे भिन्नोदरे च नास्ति॥ तथाचाङ्गिराः॥ षंढवामनकुब्जेषु गद्गदे
षु जडेषु च॥ जात्यंधबधिरे मूके न दोषः परिवेदने॥ तथाच वसिष्ठः॥ पितृव्यपुत्राः सापत्नाः
परनारीसुतास्तथा॥ दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥ तथा शातातपः॥ क्लीबे देशांतर
स्थे च पतिते वै प्रव्रजिते तथा॥ योगशास्त्राभियुक्ते च न दोषः परिवेदने॥ देशांतरस्थस्य प्र

का०नि० स्मार्तावोप्युक्तो वसिष्ठेन ॥ द्वादशैवतु वर्षाणि यास्मानधर्मप्रयोगतः ॥ साय्यः प्रतीक्षितुं स्वान
१५० क्रमयमाणः पुनः पुनरिति ॥ अधिकारिणोनुज्ञा याञ्च वसिष्ठः ॥ अग्रेन स्वक पदात्मनीरदध्या
दनुजः कृथं ॥ अग्रजानुमतः कुर्यादग्निहोमं यथाविधीति ॥ एतच्चाधिकारिणि अग्निहोत्रमकु
र्वति सेयं ॥ अनधिकारित्वातिक्रमे दोषाभावस्योक्तत्वात् ॥ २५४ ॥ ॥ छ ॥ आवसथ्यमिति ॥ औ
पनुत्तयानदोषः स्यादावसथ्यं तथाविधं ॥ ॥ अथाग्निहोत्रहोमकालः ॥ उदिते नुदि
ते होमः समयाध्युषिते मतः ॥ २५५ ॥ वसथ्यविधिं आवसथ्याग्निपरिग्रहं ॥ तथा अ
धिकारिणि अग्रजे सति यः करोति स परिवेत्ता मन्वनीत्यर्थः ॥ तथा च गार्ग्यः ॥ सोदर्ये तिष्ठति श्रे
ष्ठे न कुर्याद्दारसंग्रहं ॥ आवसथ्यं तथाधानं पतितस्तु न्यथा भवेदिति ॥ ।अथाग्निहोत्रहो राम०
मकालः ॥ उदिते इति ॥ तथा चाश्वलायनः ॥ उदिते नुदिते चैव समयाध्युषिते तथा ॥ सर्वथा १५०
वर्त्तते यस्मादिनीयं वैदिकी श्रुतिरिति ॥ २५५ ॥ ॥ छ ॥

उदितमिति ॥ तथा च स एव ॥ रात्रेः षोडशो भागे ग्रह नक्षत्र भूषिते ॥ कालं त्वनुदितं ज्ञात्वा होमं
कुर्याद्विचक्षणः ॥ तथा प्रभात समये नष्टे नक्षत्र मंडले ॥ रवियावन्न दृश्येत समया ध्युषितं
च तत् ॥ रेखामात्रं च दृश्येत तस्मिन्नस्तु समन्वितः ॥ उदितं तं विजानीयात्तत्र होमं प्रकल्पये
दिति ॥ २५६ ॥ गौणकालार्थं बौधायनवाक्यं पठति ॥ आसायमिति ॥ २५७ ॥ आकुतिरिति ॥ ॥ अथ
उदितं रविरेखायां प्रात नक्षत्रमंडले ॥ नष्टे यावन्न दृश्येत समयाध्युषितं रविः ॥ २५६ ॥ रात्रे
रनुदितं भागे षोडशे ग्रहमालिते ॥ आसायं कर्मणः प्रातरा प्रातः सायकर्मणः ॥ २५७ आकु
तिर्नातिपद्येत पार्वणं पार्वणांतरात् ॥ ॥ अथ गृहारंभः ॥ ॥ पौषश्रावणवैशाखमार्गफा
ल्गुनके गृहं ॥ २५८ ॥ ॥ गृहारंभः ॥ ॥ पौषेति आरंभे तेति शेषः ॥ तथा च विश्वकर्म मते ॥
चैत्रे शोककुलो न त्र विनाशो वैशाखे धनान्वितः ॥ ज्येष्ठे गृही विपद्येत नभसि पशुनाशकृत् शुचौ ॥ श्रा
वणे धनवृद्धिः स्यान्नभसेन व सेऽर्थहा ॥ कलहश्चाश्विने मासि भृत्यनाशं च कार्तिके ॥ मार्गशी

का॰नि॰ १४१ षयिनप्राप्तिमहस्य॥ कार्यसंग्रहः॥ माघेनवेदन्ति भयं फाल्गुने श्रीरनुत्तमेति॥ सहस्यः पौषः॥ ५८॥
मेषेति॥ अलिर्वृश्चिकः॥ गौः कर्कः॥ नक्रो मकरः॥ तथा च विश्वकर्मेत्तिरे॥ नक्रस्थे कुंभगे भानौ सिं
हगे कर्कगे तथा॥ पूर्वापश्चिमास्यं च तदा गेहं प्रकारयेत्॥ रत्नमालायामपि॥ कर्कनक्रहरिकुं
भगते र्के पूर्वपाश्चिममुखानि गृहाणि॥ तौलिमेषवृषवृश्चिकयाते दक्षिणोत्तरमुखानि गृहाणि

मेषालिवृषतौलिस्थे रवौ याम्योत्तराननं॥ गोकुंभेनक्रहरिगे प्रत्यक्प्रागाननं विधौ॥ २५९॥ ग
मृदुक्षाणि लदेवेज्यमक्षेत्रेषु स्थिरेषु ते॥ लग्ने यायैस्थिरसंसंस्थैः सौम्यैस्त्रिकोणगे॥ के

न्ति॥ २५९॥ मृदुर्केति॥ विधौ श्रवणे॥ तथा च गृहारंभप्रकल्पोक्तं॥ ध्रुवाणि तानि चास्तानि च गर्भ
भं नैऋतं तथा॥ वायव्यं वैष्णवं पुष्यं पौष्णं सावित्रमेव चेति॥ स्थिरेषु ते लग्ने इति॥ पापैः पापग्रहैः राम॰
त्रीशरससंस्थैः तृतीयैकादशषष्ठैः॥ तथा सौम्यैस्त्रिकोणगैः नवपंचमगैर्युक्ते स्थिरे लग्ने इत्य १४१
न्वयः॥ त्रिकोणकेंद्रस्थाः शुभलक्षणं॥ तथा च वसिष्ठधर्मेत्तिरे॥ स्थिरे लग्ने स्थिरांशो च चतुर्थो पर

चयान्विते॥ तथा॥ यस्य सौम्यग्रहाः केंद्रे त्रिकोणे वाथ भार्गव॥ पापाश्चोपचयस्थाने यस्मि
न् कार्यं निवेशनमिति॥ त्रिषडेकादशादशद्व्यामानुपचयमनवतानि॥ २६०॥ वापीति॥ तस्मिंस्
ग्रमपर्वे॥ अमुष्मिन् काले वाप्यारंभणमपि कुर्यादित्यर्थः॥ तथा च वसिष्ठधर्मेत्तिरे॥ प्रासादे
ष्वेवमेव स्यात्कूपवापीषु चैव हि॥ इति॥ कुमेति कन्याधनुर्मिथुनमीनकुंभस्थे सूर्ये तथा गुरौ

वापीकूपतडागानि प्रासादाश्वा सुतोनन्तु॥ कन्याचापद्वंद्वमीनघटगे तपने भृगौ॥ २६१॥ गुरौ
चास्तमिते शेषमूले सेयं हि संग्रहा न॥ भृगुके च अस्तमिते गृहं नारंभणीयमित्यर्थः॥ तथा
च विश्वकर्ममते॥ कन्यामासे रवौ सप्पकनारंभेत गृहं सुधीः॥ तथा॥ धनुः स्थिरे रवौ कार्यं न का
र्यं च कदाचन॥ तथा॥ यदा भानुस्तु मीनस्थस्तदा गेहं न कारयेत्॥ तथा॥ मिथुन वृषो यदा भानु
स्तदा वेश्म न कारयेत्॥ तथा॥ अस्तंगते गुरौ शुक्रे गृहारंभो न चास्यते॥ शेषमिति॥ शेषं वा
स्तुशीर्षादि मूलेकालनिषेधे हि स्फुटं ते यं॥ अयं संग्रहग्रंथा यतस्तस्मादित्यर्थः॥ २६२॥

अथसामान्यप्रतिष्ठाकालः॥ ॥मघादीति॥ एषुमासेषुमासेषुप्रतिष्ठाशुभास्यादित्युत्तरेणान्वयः
॥तथाचमत्स्यपुराणे॥ चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथा॥ माघेवासर्वदेवानांप्रतिष्ठाशुभ
दाभवेदिति॥ सितेइति॥ अनेनपुष्यचंद्रतिथयउच्यते॥ नशुक्लोपलक्षः॥ तथाचविद्वद्धर्मो
त्तरे॥ कृष्णपक्षेत्रिभागेतुप्रथमेस्याच्छुभावहा॥ मध्याद्वितीयेभागेतुन्यूनापेकर्तृनाशिनी॥ नी॥

अथसामान्यप्रतिष्ठाकालः॥ ॥मघादिपंचसुसितेवारेभौमान्यकेतिथौ॥ ६॥

शुक्लेत्रिभा
गेप्रथमेदेशनाशोमकीर्तिता॥ द्वितीयेमध्यफलदातृतीयेवाशुभावहा॥ धनधान्यवती
स्फीतवरदाचतथाभवेदिति॥ प्रतिष्ठेतिशेषः॥ वारेइति॥ मंगलादन्यवारेइति॥ तथाचविद्वद्धु
र्मोत्तरे॥ तेजस्विनीसूर्यदिनेचंद्रेक्षेमावहाभवेत॥ भौमेग्निनाप्रदहोतबुधेचधनदाभ
वेत॥ गुरुणास्याद्गुणोनित्यंलोकानंदकामंदकरीसिते॥ आचंद्रार्कस्थिरासौरेप्रतिष्ठासमदा

अरिक्ताइति॥ चतुर्थीनवमीचतुर्दशीव्यतिरिक्ते॥ तथाचविद्वद्धर्मोत्तरे॥ द्वठाधनवतीस्फीतात
थाप्रतिपदिस्मृता॥ द्वितीयायांधनोपेतातृतीयायांवरप्रदा॥ चतुर्थ्यांनाशमाप्नोतिप्रयमस्य
स्यासुखावहा॥ विनायकस्यदेवस्यदेवस्यतथातत्रहितप्रदा॥ पंचम्यांश्रीयुताकर्तुर्वरदाचतथा
भवेत॥ षष्ठ्यांलक्ष्मीयुतानित्यंसप्तम्यांरोगनाशिनी॥ अष्टम्यांधान्यबहुलानवम्यांतुविनश्यत
ति॥ मंदकाम्या॥ कृतातस्यकर्तुर्भवतिपुष्टये॥ धर्मवृद्धिकरीज्ञेयाद्वादशम्यांतुतथाकृता॥ एकाद

अरिक्तेश्रवणेन्द्राकादित्याश्विप्रेमृदुध्रुवे॥ ॥७॥ ॥

श्यांतथायुक्ताद्वादश्यांसर्वकामदा॥ त्रयोदश्यांचविज्ञेयाचतुर्दश्यांविनश्यति॥ कृष्णपक्षे
पंचदश्यांकर्तुःक्षयकरीभवेत॥ पंचदश्यांशुक्लपक्षेसर्वकामकरीभवेत॥ अरिक्तेइति॥ त
थाचवासिष्ठे॥ आषाढेदेवताधामूलमुत्तरात्रयमेवच॥ ज्येष्ठाश्रवणरोहिण्यः पूर्वानाद्रपदा
तथाहस्तोश्विनीरेवतीचपुष्योमृगशिरस्तथा॥ अनुराधातथास्वातीप्रतिष्ठासुप्रशस्यतेइति

का०नि० कर्तृराशेरिति॥ कर्तृराशेः प्रतिष्ठाकर्तुर्जन्मराशिमारभ्य आदिसंख्याके स्थिरे वृषसिंहे वृश्चिक
१४३ कुंभे द्वंद्वकन्याधनुर्षे मिथुनकन्याधनुर्मीने पापैस्त्र्यायारिगैः तृतीयैकादशषष्ठगैः तथा सौ
म्यायाष्टवर्जितैर्यदि शास्त्रमवर्जितैर्युते लग्ने प्रतिष्ठा शुभा स्यात्॥ तथा च विष्णुधर्मोत्त
रे॥ जन्मराश्युदये कर्तुः क्षिप्रं नाशकरी भवेत्॥ द्वितीये धननाशाय तृतीये कर्तृवृद्धिदा च

कर्तृराशेर्द्वित्रिषष्ठदशमैकादशे शुभा॥ २६३॥ प्रतिष्ठा स्थिरलग्ने स्यात् द्वंद्व
कन्याधनुर्झषे॥ पापैस्त्र्यायारिगे युक्ते सौम्यैर्व्यायाष्टवर्जितैः॥ ६४॥ ॥

तुर्थेर्थहनाशाय पंचमे व्याधिदा भवेत्॥ षष्ठे शत्रुविनाशाय सप्तमे धनदा भवेत्॥ ॥द्वादशे
तु न याम स्यात् प्रतिष्ठा तु तथा कृता॥ जन्मलग्नादये श्रेष्ठा धनधान्यवती भवेत्॥ जन्मरा
शिफलं सर्वं शेषस्थानेषु निर्दिशेत्॥ तथा॥ मेषोदये कृता क्षिप्रं नाशमाप्नोति पार्थिव॥ वृ राम०
षोदये स्थिरा प्रोक्ता धनधान्यवती भवेत्॥ लोककांता च मिथुने बहुकल्याणकारिणी॥ क १४३

र्कटे क्षिप्रनाशाय सिंहे च सुखदा भवेत्॥ कन्यायां लोककांता स्यात् तुले भवति च स्थिरा॥ वृश्चिके
तु स्थिरा प्रोक्ता कल्याणाय धनुर्धरे॥ मकरे क्षिप्रनाशः स्यात् कुंभलग्ने दृढा भवेत्॥ मीने गुण्या
वहा कर्तुः कन्याश्चान्यान याम वेदिति॥ तथा॥ रविर्दशमत्रिषट् संस्थो राहुस्त्रिदशसंयुता॥ ष
ष्ठत्रिस्थानगता चास्तामंदांगारककेतवः॥ शुभाश्च राश्यरिपापाश्च सर्वे एकादशोस्थिता इ

अथ शिवप्रतिष्ठाकालः॥ ॥यतीनां सर्वकाले तु लिंगस्यारोपणं मतं॥॥ ॥अथ विष्णुप्र
तिष्ठा॥ ॥शुक्लपक्षे स्थिरे लग्ने हरिः स्थाप्यो नरैः सदा॥ २६५॥ ति॥ अत्रैव सर्वेषां प्रत्ले
कंभावफलान्युक्तानि॥ तत्र सौम्याः सर्वत्र शुभाः॥ चंद्रस्तु षाढशाद्वर्जितः सर्वत्र शुभः॥
॥२६४॥ बृहन्नीलालिख्यते॥ ॥अथ शिवप्रतिष्ठाकालः॥ यतीनामिति॥ एतल्लक्षणं समु
च्चयसंस्थं ग्रहवाक्यं पठितं॥ आरोपणं प्रतिष्ठा॥ ॥अथ विष्णुप्रतिष्ठा॥ ॥शुक्लपक्ष इति॥
तथा च नृसिंहपुराणे॥ पूर्वपक्षे शुभे काले स्थिरे चोर्द्ध्वमुखेपि भे॥ अ०नुकूले च लग्ने च हरिः स्था
प्यो बुधैः सदेति॥ ६५॥ ॥

अथ देवीप्रतिष्ठा॥ ॥देवीपुराणस्थवाक्यं पठति॥ मानुभे रवेनि॥ अत्र स्पष्टं ॥२६६॥ ॥अत्रैव
वकालनियममाह॥ ॥सर्वकालइति॥ तथाच मनुः॥ षष्ठिप्रतिष्ठायां॥ अत्र तोस्थापनं तु प्रवक्ष्या
मि सर्वकामप्रसाधनं॥ सर्वकालं प्रकर्तव्यं कृष्णपक्षे विशेषतः॥ रात्रौ रूपा यतो देवी दिवा रूपो
महेश्वरः॥ अतः सकालपूजानिःशिविदापरमेश्वरीति॥ ॥अथ वाप्यादिप्रतिष्ठाकालः॥

अथ देवीप्रतिष्ठा॥॥ ॥मानुभे रवौ वाराह नरसिंह त्रिविक्रमः॥ महिषासुरहं अश्वस्थाप्या
वै दाक्षिणायने॥६७॥ सर्वकाले यवाप्यादि धनुःसिंहाद्य वर्जिते॥ लग्नेषु नेति याप्यूर्वे कूपस
अथ वाप्यादीति॥ आद्यो मेषः॥ तथाच भविष्यत्पुराणे॥ तस्मिन्नस बकुलांबुनि॥ २६८॥
लिलसंपूर्णे कार्तिके च विशेषतः॥ तडागस्य विधिः कार्यः स्थिरनक्षत्रयोगतः॥ तथाच वह्नि
वह्निपुराणे॥ वापीकूपतडागानां तस्मिन्काले विधिः स्मृतः॥ सुदिने शुभनक्षत्रे प्रतिष्ठा शु
भदा स्मृता॥ कर्कटे पुत्रलाभश्च सौख्यं तु मकरे भवेत्॥ मीने यशोऽपयशो न स्यात् कुंभे च सुखहृत्
के

वृषे च मिथुने वृद्धिर्वृश्चिके च जलं भवेत्॥ पितृनाशिस्तु कन्यायां तुलायां तु गाश्वती गतिः॥ सिंहे
मेषे धनुर्नाशो लक्ष्म्याश्च द्विजन्नृपतीति॥ बह्वृदके वाप्यादौ कालनियमो नास्तीत्याह॥ कूपस्य
बकुलांबुनि इति॥ बकुलांबुनि सति कूपस्य प्रतिष्ठा कार्येत्यर्थः॥ कूपसेवेत द्रुपलक्षण मितरे
षां॥ तथाच भविष्योत्तरे॥ मुनयः केचिदिच्छंति यत्नात्पातेचोत्तरायणे॥ न कालनियमस्तत्र प्रमाण

अथ नानादेवतादीक्षाकालः॥ ॥दीक्षालग्नमत्र वर्षत्रौ मासि मार्गश्रुचिविना॥ पवित्रकति थौप
वर्ष उन्नीति सुरवेषु च॥ २६९॥ ॥ सलिलं यतइति॥ ॥२६८॥ ॥अथ नानादेवतादीक्षाका
लः॥ ॥दीक्षेति॥ वर्षर्तु विना सर्वर्तुषु दीक्षा कार्येत्यर्थः॥ तथाच कालोत्तरे॥ शरद्वसंतयोर्यो
गो दीक्षाकर्मविधौ स्मृता॥ तयोरसंभवे वर्षं विना न्यत्रापि शस्यतइति॥ एवं ऋतुकालमुक्त्वा
मासानाह॥ ॥मासीति॥ शुचिराषाढः॥ ॥तथाच कारेण पूर्वषाढे च मासे च॥ आषाढे मा
से च॥ आषाढे मार्गशीर्षके॥ दीक्षा न कारयेद्धीमान् अन्यमासेषु कारयेदिति वर्ष

र्णं वपि तिथिविशेषमाह॥ पवित्रकतिथाविति॥ तथाचागमे॥ पवित्रकतिथावपि दीक्षकर्म वि
धोचरेदिति॥ २६९॥ कालविशेषमाह॥ पर्वेति॥ तथाच कालोत्तरे॥ दीक्षापात्रनिषेको च तथा
मंत्रपरिग्रहे॥ ग्रहणे ग्रहणमोक्षे च कृष्यात्तन्न कर्मणि॥ कार्त्तिक्यां चैव वैशाख्यां स्वभानो
रपि दर्शने॥ तथा॥ चंद्रसूर्योपरागेषु त्रीतिमुख्येषु च॥ नहनक्षत्रयोगेषु द्विपुवेषू त्तर
कार्त्तिक्यां शुभनक्षत्रे वैशाख्यां विषुवे यने॥ रिक्ताष्टष्टमी पूर्णां विनाक्षिप्रमृदुध्रुवे॥२७०
वेषु च॥ अयनेषु च सर्वेषु योगः सर्वार्थसिद्धिदः इति॥ रिक्तेति॥ एतच्च तिथि रिक्तासु ति
थिषु दीक्षा कार्येत्यर्थः॥ तथाच रत्नावल्यां॥ चतुर्थीनवमीषष्ठीमष्टमीं च चतुर्दशीं॥ पौर्ण
मासीं विना शेषा हिता नूनं बुबुक्षुषु॥ क्षिप्रेति॥ क्षिप्राणि अश्विनी पुष्य हस्ताः॥ मृ
दुनि मृग रेवती चित्रा नुराधाः॥ ध्रुवाणि रोहिणी त्र्युत्तरा॥ २७०॥ ॥छ॥

स्वातीति॥ आदित्यं पुनर्वसु॥ हरिः श्रवणः॥ शिष्यनाद्युत्तरेषु शिष्यजन्मनक्षत्रं तदाद्यं तदुत्तमं
वा॥ तथाच कारणे॥ पौष्णरोहिण्यपथादित्यं श्रवणं चाश्विनी तथा॥ सावित्रं त्वाष्ट्रवायव्यं नैरृतं
मित्रमेव च॥ शिष्यं चित्रोत्तराश्चैव अथवा शिष्यजन्मजं॥ नक्षत्राणि प्रशस्तानि दीक्षाकर्मणि
सुव्रतेति तथा रत्नावल्यां॥ त्र्युत्तराणि रोहिण्यः पुष्यार्कमृगशीर्षके॥ हस्तस्वातिरनुराधाश्व
स्वातिमलादित्यहरिशिष्यभाद्युत्तरेषु वा॥ यातिथिर्यस्य देवस्य तत्तिथौ तन्मनुर्मतः॥ २७१॥
न तिथिर्न च नक्षत्रं नोपवासादिका क्रिया॥ दुर्लभे सद्गुरूणां च सकृत्संग उपस्थिते॥ २७२॥
धामूलं च रेवती॥ इत्यादितंत्रमघा आद्रचित्स सर्वसमतत्वादुपेक्षिता॥ यातिथिरिति॥ तथाचत
त्वसागरसंहितायां॥ तां तिथिं समालोच्य तन्मंत्रं दीक्षयेदिति॥ २७१॥ ॥ तिथ्ययोर्वक्ष्यंते
न तिथिरिति॥ तथाच तत्त्वसागरे॥ तिथिं विना पि दीक्षायां विशिष्टावसरं शृणु॥ दुर्लभे सद्गुरू
णां तु सकृत्संग उपस्थिते॥ न तिथिर्न व्रतं होमो न स्नानं न जपक्रिया॥ दीक्षायाः कारणं किंतु

का०नि० पत्रेछानोगुरुर्वसेदिति॥ ॥अथविष्णुदीक्षा॥ ॥शुक्लपक्षे हरेर्दीक्षा द्वादश्यां क्रमेतथेति
१५६ तथाचमहापंचरात्रे॥ द्वादश्यांशुक्लपक्षस्य सूर्यसंक्रमणेतथेति॥ २७२॥ ॥अथनैमित्तिकादि
देवपूजाकालः॥ ॥त्रिधेति॥सुरार्चनादितुप्राधान्याद्धुक्रमपि अन्यकार्याणामुपलक्षण॥तत
स्तत्रतत्रोक्तमन्यदपिकार्यं॥तथाचविष्णुधर्मोत्तरे॥ यजनंप्रतिमायांतुतत्रमंपरिकीर्ति
अथनैमित्तिकादिदेवपूजाकालः॥ ॥त्रिधाविनिक्तदिवसप्रातःकालेसुरार्चनं॥मध्याह्नेतीर्थ
कार्यंस्नातसायंरक्षाकरीक्रिया॥ २७३॥ ॥
तंवाग्रहयेत्यादि॥तथाचतत्रैव॥प्रातःकालांत
रमारभ्यावद्वैदणानाडिका॥ तावद्धापिचकर्तव्यंतीर्थकार्यंप्रजापते॥अंकुरांचषका
र्यंतत्रस्ववसाधिवासरे॥सायंचप्रारमेद्धीमानरक्षासूत्रप्रबंधनं॥स्नापनंप्रोक्षणंचैव
गर्जनासंतथैवच॥अधिवासनानिसर्वाणिमध्यरात्रेतुकारयेत्॥रात्र्यंतरेविशेषेण राम०
सर्वदेवक्रियार्पणं॥कुर्यात्परंमहासर्वंतदाशुननि वृत्तयेदति॥ २७३॥ ॥छ॥ ॥ १५६

अथविष्णुपूजाकालः॥ ॥कालत्रयमिति॥तथाचनारदीये॥प्रातर्मध्यंदिनेसायंविष्णुपूजांसमाच
रेत्॥ यथासंध्यात्रयानित्यादेवपूजास्मृताबुधैः॥अशक्तोविस्तरेणैवप्रातःसंपूज्यकेशवं
॥मध्याह्नेचैवसायंचपुष्पांजलिमपिक्षिपेत्॥मध्याह्नेवाविस्तरेणसंक्षेपेणाथवाहरिं
॥संपूज्यभोजनंकुर्यात्अन्यथानरकंव्रजेदिति॥ २७४॥ ॥अथदेवताविशेषपूजनेति
ब्रह्मारुणोदयेध्येयनिशीथेत्वधिवासनं॥ ॥अथविष्णुपूजाकालः॥ ॥कालत्रयेहरेःपू
जाशक्तोमध्यंदिनेभवेत्॥ २७४॥ ॥अथदेवताविशेषपूजनेतिथिविशेषः॥ ॥ ॥अग्निर्ल
क्ष्मीर्वाविघ्नराजाहिस्कंदभानवः॥शिवाद्दुर्गादिधनपतेरिनंत्यपमूतया॥ २७५॥ ॥छ॥॥
थिविशेषाः॥ ॥अग्नीति॥तथाचभविष्यत्पुराणे॥द्वादशाकल्पा॥प्रतिपत्स्याद्वकोप्रोक्ता द्विती
याश्रमनस्यच॥तृतीयागिरिपुत्र्यास्कचतुर्थीविघ्नहारिणः॥पंचमीनाभाजांनाषष्ठी
स्कंदेतिविष्कृता॥सप्तमीसप्तसप्तेस्तुअष्टमूर्तेस्तथाष्टमी॥नवमीयोगिनीनांतुदशमीतु

दिनामपि॥ एकादश्यां धनेशस्य यात्दश्यां चक्रधारिणः॥ त्रयोदश्यां त्वनंगस्य भूतेशस्य चतुर्दश्यां पौ
र्णमास्यां प्रजेशस्यापि नृणां दर्शन्तु सत्तम इति॥ २७५॥ ॥अथ कामनाभेदेन देवतापूजाका
लः॥ ॥अमायामिति॥ पशुपतिः शिवः॥ अनंतरप्रकरणस्तेन यजेदित्यनेन संबंधः॥ तथा च
कूर्मपुराणे॥ अमावास्यां तिथिं प्राप्य यआराधयते नरं॥ ब्राह्मणं पूजयित्वा तु सर्वपापैः
ब्रह्मापितानितिथिषेतान्क्रमादधिपतीन्यजेत॥ ॥अथ कामनाभेदेन देवतापूजा॥ ॥अ
मायां ब्रह्म पशुपतौ यो प्रत्नभूता ष्टमीदिने॥ २७६॥ त्रयोदश्यां तथा रात्रौ शिवं यामेन्त्रतो यम
॥ चतुर्थ्यां अथ चैत्रादौ विधिशेषं तु भूलतः॥ २७७॥ ॥छ॥ प्रमुच्यत इति॥ कृष्णेति॥ भूताचतु
र्दश्यां॥ तथा च तत्रैव॥ कृष्णाष्टम्यां महादेवं तथा कृष्णचतुर्दशीं॥ संपूज्य ब्राह्मणमुखे सर्वपापैः
प्रमुच्यते॥ २७८॥ त्रयोदश्यां तथा रात्रौ सोपहारं त्रिलोचनं॥ दृष्ट्वेशं प्रथमे यामे सर्वपापैः प्रमु
च्यत इति॥ योमा इति॥ याम्यामनरणी॥ तथा च तत्रैव॥ मरल्पां तु चतुर्थ्यां तु नागेश्वरदिने यमं॥ राम॰ १४७

पूजयेत्सप्तजन्मोत्थैर्मुच्यते पातकैर्नर इति॥ अथ चैत्रेति॥ आद्यः प्रतिपत्॥ तथा विष्णुधर्मोत्तरे॥
चैत्रमासस्य मासुक्ल प्रथमा प्रतिपद्भवेत्॥ तदाहि ब्रह्मणः कृत्वा सोपवासस्तु पूजनं संवत्स
रमवाप्नोति सौख्यानि भृगुनंदनेति॥ शेषमिति॥ शेषमनुक्तं मूलतः कालनिर्णये विज्ञेयं
॥ तथा च तत्र॥ अग्निमिष्ट्वा च कृत्वा चेत्यादिनोक्तं इति॥ २७८॥ ॥अथ नक्षत्रदेवतापूजा
विज्ञो यमश्विनौ कालानलब्रह्मेंदुवांकराः॥ अदितिर्ज्याहिपितरो भगार्यमदिवाकराः॥ १॥
त्वष्टानिलेंद्राग्निमित्राख्यकरक्षः पतिजलं॥ विश्वे हरिर्वसुजलपसैकचरणाः क्रमात्॥ २॥
॥विज्ञोक्यमश्विनाविति॥ अश्विन्यादिषु नक्षत्रेषु क्रमात्॥ अश्विनौ इत्यादिना यजेत्॥
तथा च देवीपुराणे॥ अश्विनामश्विनौ विष्णुदीर्घायुर्जायते नर इत्यादिनोक्तं ज्ञेयं॥ ७८॥ ७९॥
अथ तिथिनक्षत्रयोगदेवतापूजा॥ तिष्येति॥ तिष्यः पुष्यः॥ तथा च देवीपुराणे॥ देव
व्योगाद्द्वादश्यां षष्ठ्यां पुष्यर्क्षे रविवासरे॥ स्कंदयागस्तदा कार्यः सर्वकामप्रदायक इति

भानाविति ।। भानुः सप्तमी ।। तथा च तत्रैव ।। यदा वा सैषैवी सूर्यवारेण सप्तमी विजया तु सा ।। तस्या
पभवने भानोर्योगः सर्वगुणावह इति ।। २८० ।। योगः शशिनीति ।। रोहिणी माह ।। तथा च तत्रैव ब्र
ह्मरिक्ता समायोग आर्द्रर्क्षे मातृपूजनमिति ।। गुरोश्चैवेति ।। चांद्रे मृगः ।। तथा च तत्रैव ।। गु
र्वर्क्षे गुरुवारे च आद्रूपाश्रवणे तथा ।। मृगशीर्षे तदा योगो विष्णोः सर्वार्थसाधक इति ।। २८
हिर्बुध्न्यक पूजा ख्याता श्विन्यादिषु मातृ पजेत् ।। अथ तिथि भिन्न नक्षत्र योग पूजा ।। तिथ्येष
रूपारवी स्कंदयजिन नीरवो तुरवेः ।। २८० ।। योगः नोग्नि निरिक्ता यां रोहिणी मातृयजि गुरौ ।। श्रुतो
वा द्वितीये चान्द्रे विष्णुपूजा निबंधनः ।। ८१ ।। नो षष्ठे यमम्पाकुर्यात्तु विष्णो रोपणे द्विवे ।। छ
षष्ठेयमिति ।। द्वितीयायां यदा सोमे कृत्तिकाक्षं भवेत् क्वचित् ।। महायोगस्तदा कार्यः सर्वकाम
प्रदायक इति ।। इत्यादि कालनिर्णयेतेयं ।। अथ पवित्रारोपणं ।। अथो कुर्यादिति ।। शुचिरा षाढः
तथा चोक्तं कालोत्तरे ।। आषाढां ते चतुर्दश्यां न मस्य नन्न सोऽस्त था ।। अष्टमां च चतुर्दश्यां पक्षयो

रुभयोः समं ।। पवित्रारोपणं कार्यं नतु कालो नरेश्वर्हमिति ।। आषाढांतः इत्यनेन पौर्णमास्यंभव
तश्चांद्रो विवक्षितः ।। आषाढशुक्लचतुर्दश्यामित्यर्थः ।। तथा च मोहचूडोत्तरे ।। आषाढस्यासि
तो द्वि श्रावणस्य सितासितेति ।। आचार्यैस्तु सर्वमाससंबंधि शुक्लपदं पक्षयुक्तं तन्मुख्य
त्वाभिप्रायेण ।। तथा च कालोत्तरे ।। भौतिकायां विशेषेण शुक्लपक्षेद्ययं विधि ।। रिति ।। पुनश्शु
श्र्वादिषु तु मासेषु शुक्ले मृताष्टमी दिने ।। २८१ ।। गोदोहांतरिते था वाद्यो धिवासनं ।। ।।
[illegible]ष्णुपवित्रकालः ।। श्रावणे श्रवणे विष्णो पूर्णायां वासरे ।। २८६ ।। ।। छ ।। ।।
कापयादनमन्यानघटन इति भावः ।। २८२ ।। ।। गोदोहेति ।। तथोक्तं च ।। अधिवासस्य योर्
र्ध्याम परेह्नि विधिद्वयं ।। गोदोहांतरितं कृत्वाथ ।। दिसाध्य मनमानसः ।। चतुर्दश्यां क्षणे कु
र्यात्साधिवासं पवित्रकं ।। सुपवित्रं पौर्णमास्यां तिथिवेधे त्वयं क्रमः ।। अष्टम्यामपि बोद्धव्यः
क्रमोयं सूत्ररोपणे इति ।। अथ विष्णुपवित्रकालः ।। श्रावण इति ।। विष्णोरतिप्रियावत्र नीयं ।। तद्व

का॰नि॰ आवृत्तिशक्तिभिन्ने पंडितमनेनासिद्धं ॥ विष्णौ देवपवित्रारोपणं कुर्यादिति पूर्वेणान्वयः ॥ विष्णौ दा
१५९ दश्यां ॥ अहिवासरे पंचम्यां ॥ तथा च विष्णुरहस्ये ॥ श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे ॥ द्वा
दश्यां वासुदेवाय पवित्रारोपणं स्मृतं ॥ तथा ॥ द्वादश्यां श्रीवत्सेवापि पंचम्यामथवा द्विज आतुक
ल्पे तु कर्तव्यं पंचदश्यामथापि वेति ॥ १८३ ॥ मुख्येति ॥ मुख्यालाभे मुख्यकालालाभे इत्यर्थः ॥
मुख्यालाभे हि सर्वत्र यावल्लौतिष्ठते हरिः ॥ ॥ अथ सर्वदेवपवित्रकालः ॥ देवतानां स्वीय
तिथौ साधारणमिदं वसौ ॥ १८४ ॥ ॥ छ ॥ तथा च मंत्रतंत्रप्रकाशे ॥ कर्कटके गते सूर्ये
तथा सिंहगतेपि वा ॥ द्वादश्यां शुक्लपक्षस्य हरे दद्यात्पवित्रकं ॥ अथ चेद्विघ्नयोगेन मुख्यका
लो न लभ्यते ॥ कन्यायां वापि कुर्वीत यावल्लौतिष्ठते हरिरिति ॥ ॥ अथ सर्वदेवतापवित्रकालः ॥ राम
देवजानामिति ॥ स्त्रीदः इति ॥ पुष्पेति विप्रकरणोक्ततिथौ ॥ अथवा कालोत्तरे ॥ वह्नेः स्कंद ब्रह्म १५९
णो गोपगणेन्द्राहिषु पंचमी ॥ षण्मुखस्याथ सूर्यस्य शिवस्याष्टमी हिता ॥ अंबिका

याः कृतान्तस्य रुद्राणां चक्रधारिणः ॥ कामस्य तु त्रयोदश्यां चतुर्दश्यां शिवस्य तु ॥ पितॄणां चैव पूर्णि
मायां गुरुयागं च कारयेत् ॥ इति ॥ १८५ ॥ पूर्णिमायामिति ॥ वसुरष्टमी ॥ इदं पवित्रारोपणं सर्व
देवसाधारणमष्टम्यादाविस्पर्थः ॥ तथा च कालोत्तरे ॥ चतुर्दश्यामष्टम्यां सर्वसाधारणं हि
तदिति ॥ अथ दमनकालः ॥ दमनेति ॥ तथा च देवीपुराणे ब्रह्मोवाच ॥ चैत्रादौ कारयेत् पूजां
पूर्णिमायां नूतने दिने दमनारोपणक्रिया ॥ चैत्रादौ स्वीयतिथिषु पाटलं कमलं सितं ॥ १८५ ॥
अथ कालविशेषे पुष्पविशेषः ॥ कल्हारं मल्लिका चंपकं दंबजातिपंकजे ॥ शतपत्रं नीलद
लं श्रोणं कुंदं समुद्गरः ॥ १८६ ॥ ॥ छ ॥ मम वज्रराववधिः स्यादित्ते यं ॥ १८७ ॥ ॥ कालवि
शेषे पुष्पविशेषः ॥ पाटलं इति ॥ कल्हारमिति ॥ तथा च क्रियाकांडे ॥ वैशाखे मासि कर्तव्या
पूजा पाटलपाप्रतो ॥ सर्वान्कामानवाप्नोति ज्येष्ठे पद्मार्चनात्तथा ॥ आषाढे बिल्वकल्हा
रो हितं चल मते फलं ॥ नवमल्लिकया पूजा नभो मासि महाफला ॥ कदंबैश्चंपकैरेवं नभस्ये

का॰नि॰ सर्वकामदा॥ आश्विने चंपकैर्नित्यं नीलोत्पलैः। मल्लिकापूजनं प्रोक्तं॥ कार्त्तिके शतपत्रैश्च
१५० नीलोत्पलैः सुगंधैः पूजा कर्तव्या मार्गशीर्षके॥ पूजनं द्रोणकुसुमैः पुष्पैर्नानाफलप्रदं॥ माघफा
ल्गुनयोः पुष्पैः पूजने कुंदमुद्गरैः। चैत्रे दमनकैश्चापि पूजनं शतपत्रकैरिति॥ २८६॥ ॥अथ पुष्प
आदिपुष्पकालः॥ ॥रात्रौ शंभोरिति॥ तथा चोक्तं॥ कानि कानि कदंबानि रात्रौ देयानि शंकरे दिवा
नो माधवे देवे सुपुष्पाणि निशि वपुजने॥ ॥रा आदि पुष्पकालः॥ ॥रात्रौ शंभोः कदंबानि
न कानि च मल्लिका॥ २८७॥ मालती प्रथमे यामे करवीरमहर्निशं॥ नंद्यावर्तादि मध्याह्ने शे
षपुष्पाणि सर्वदा॥ २८८॥ ॥छ॥ शेषाणि देयानि दिवा रात्रौ च मल्लिका इति॥ २८९॥ मालती
तथा चोक्तं॥ प्रहरंति प्रतेजाति करवीरमहर्निशमिति॥ नंद्यावर्तेति॥ तथा चाकूः॥ नंद्या
वर्तं शिपावर्तं श्वेतार्कं श्वेतपुष्पकं॥ पुन्नागं पद्मिकाषोठा मालतीमुद्गपेदरन्॥ पंकजं बृ
हती याश्चैव्याघ्रा मंकरवीरकं॥ जपालं पाटली द्रोणं मध्याह्ने तु प्रदापयेत्॥ शेषपुष्पाणीति॥ त
था राम॰ १५०

चाकूः॥ अन्यपुष्पाणि सर्वाणि संध्यायामुदयादयेदिति॥ २९०॥ सुगंधिनि चेति॥ ॥निर्गंधान्सु
त्रगंधिनि इतिनिषेधात् सुगंधिनीत्युक्तं॥ ॥अथ पुष्पाभावे पत्रादिपूजा॥ पत्रैस्त्विति॥ तथा
एकपादपुराणे॥ अभावे पत्रपुष्पाणामन्नाद्येनापि पूजयेत्॥ व्रीहितंदुलगोधूमैर्यवैर्वा
पि समर्चयेत्॥ गाणपत्यमवाप्नोति गुरुलोके वसेन्नरः॥ तथान्न विष्णुपुराणे॥ अन्नावेनहि पु
अथ पुष्पाभावे पत्रादिपूजा॥ ॥सुगंधानि च पत्रैः स्यात् पूर्वभावे परैर्यजेत॥ फलतंदुलगोधूम
गुल्मौषधि तृणांबुभिः॥ २९१॥ ॥क्षुद्रकर्मकालः॥ कुलिकस्य विरोधा गः स्तारावैनाशिकाः कुजः
अष्टमो राशिरित्याद्याः कालाः सुः क्षुद्रकर्मणि॥ २९२॥ ॥छ॥ ष्पाणां पत्राण्यपि निवे
दयेत्॥ पत्राणामप्यभावे तु फलान्यपि निवेदयेत्॥ फलानामप्यभावे तु तृणगुल्मौषधीरपि
औषधीनामभावे तु नमस्यानंतिपूजितं इति॥ २९३॥ ॥अथ क्षुद्रकर्मकालः॥ ॥कुलिकेति॥ स्वयमेव व्याचष्टे कुलिष्टे कुलिकः॥ मन्वकदिग्वस्वतु वेदपक्षे रक्षोरक्षात्मुहूर्तैः कुलिका
न वेति॥ २९४॥

खविरः गुरुरिति॥ ९१॥ ताराश्चनिःस्त्रश्चेति॥ ९२॥ वैनाशिकमित्यादि॥ आदिशब्देन कलातिथि
वेलानांग्रहणं॥ तत्र कालनाम शुक्लपक्षे चंद्रकाला वर्धते॥ कृष्णपक्षे क्षीयते॥ तत्रा कृष्ण
काले अष्टमीमारभ्य अमावास्यापर्यंतं कुर्यात्॥ तिथयश्च चतुर्थ्याद्याः॥ चंद्रोदयमारभ्य च

खविरः॥ गुरुरथ वंशके क्षेत्रे तयोरेव दिनं यदि॥ तद्दिने खांशके रिक्ते रोगणादि प्रतिक्रिया॥
९१॥ ताराश्च॥ निःस्त्रश्च पूर्वा भरणी मघाश्च पंच चाग्नवीर्याणि वदंति तत्ताः रौद्रं मूलं रगदेव
तानि क्रूराणि तेषु प्रग्रहः स्यात्॥ ९२॥ वैनाशिकं त्रयो विंशं वरारम्भमिति चोदितं॥ द्वाविंशाहे तु
मंदाद्यैरष्टाशीत्यंश कृद्दिनं॥ ९३॥ ॥ छ॥ चतुर्दशघटिकापर्यंतं समुद्रस्य क्षोभो भवति॥
॥ सा चंद्रकलानाम तदा लंघनादिकर्म न कुर्यात्॥ तदारभ्य पुनः पंचदश घटिकापर्यं
तं वेलानास्ति तदास्तं नं कुर्यादिति॥ ९३॥ ॥छ॥

अथ वश्यादिकर्मकालः॥ वश्येति॥ तथा च मंत्रतंत्रप्रकाशे॥ दिनादि यामिनी यांत मृत वः ष
ट्कावच्छिताः॥ रात्रीरात्र्याः समाक्रम्य नाडीर्दश समक्रमात्॥ आरक्तधवलो बालः शशिरो व
श्यकर्मणि॥ उच्चाटने प्रति स्तंभे वसंतो लोहितो युवा॥ तीक्ष्णो धूम्रशरीरश्च मारणे सति युज्यते
॥ प्रावृट् धूम्रशरीरश्च स्तंभने संनियोजितः॥ शरत्कामागता कृष्टौ मंत्रतैः गुरुपूजकैः॥

कुजो नोमः अष्टमो राशिः॥ उत्पत्तिराशितश्चंद्रो वश्येनाष्टमके यदा॥ ९४॥ वश्यादिकर्मका
लः॥ वश्योच्चाटनमृतिस्तंभाकृष्टिमोहोजनादयः॥ कृतवः शांतिकं प्रातरुच्चाटाद्यपराह्णिके
॥ ९५॥
हेमंतो धवलो वृद्धः शांत वश्यादिकर्मकृत्॥ तथा च मंत्रतंत्रप्रकाशे॥ पूर्वाह्णे शुभदं
कर्म बालत्वापि निगद्यते॥ लक्ष्मीः सारस्वतं वश्यमाकृष्टिः शांतिकं तथा॥ ओ पुष्टिवर्धनं चेति
षट्शुभानि प्रचक्षते॥ तथा च मंत्रतंत्रे॥ प्रदोषो तु दिवा रात्रौ स्तंभनं चापराह्णिकं॥ विद्वेषा
यजेन्मंत्रं मध्याह्ने तु जरायच॥ उच्चाटनार्थायतने मध्याह्नात् परतो मनुः॥ मारणे तु प्रकर्तुं

संपामाद्यूर्ध्वं द्वितीयकादिति॥२९५॥ हरौ स्वापः॥ मैत्रे अनुराधायां निद्रा हरेः स्वापः स्वा पः स्या
त्॥ तथा भाद्रपदे द्वादश्यां श्रुतौ श्रवणे संध्यायां परिवृत्तिः स्यात्॥ तथा ऊर्जे कार्त्तिके द्वादश्यां पू
ष्णि रेवत्यां दिवा बोधः स्यात् इत्यर्थः॥ न तत्र नक्षत्र द्वादशी योगः तन्मासगत शुक्लपक्ष एव नवती
त पाक्षिनः पक्षोतेयः॥ तथा च भविष्यपुराणे॥ आभाकासितपक्षेषु मैत्रश्रवणरेवती॥
विष्णुस्वापनादिकाजः॥ ॥शुचौ कर्के हरौ मैत्रे निद्रा स्वापो हरेः श्रुतौ॥ संध्यायां परिवृत्तिः स्या
द्युत्थानं पूष्णे दिवा॥२९६॥ आदिमध्यावसानेषु प्रस्वापावर्त्तनोत्सवः॥ आदिपादे अ
नुराधायां॥ मध्यपादे श्रवणे॥ अंत्यपादे रेवत्यां॥ क्रमादाषाढ भाद्रपद कार्त्तिकमासेषु
प्रस्वापोद्वर्त्तनोद्बोधाः स्युरित्यर्थः॥ तथा॥ द्वादश्यां शुक्लपक्षे च प्रस्वापावर्त्तनोत्सव इति॥
तथा॥ निद्रा स्वापो दिवोत्थानं संध्यायां परिवर्त्तनं॥ अन्यत्र पादयोगेपि द्वादश्यामेव कारये राम०
दिति॥ २९६॥ ॥छ॥ १५२

नक्षत्रयोगाभावे द्वादश्यामेव कार्यमित्याह॥ हर इति॥ द्वादश्यां नक्षत्राभावे तिथिषु तन्मास
द्वादश्यामेव कार्यमित्यर्थः॥ तथा च वाराहपुराणे॥ द्वादश्यां संधिसमये नक्षत्राणामसंभ
वे॥ आभाकासितपक्षेषु स्वापनावर्त्तनादिकमिति॥ संधिसमये संध्याकाल इत्यर्थः॥ अन्यदे
वत्ये॥ तत्रान्ति विधिरिति॥ तत्र थितित्रिषु वा कार्यमित्यर्थः॥ तदुक्तं पुष्करपुराणे॥ यस्य यस्या
स्तु हे वस्यात्तस्मिंश्चेष्ठ पनकर्त्तव्यतामिति॥ भाद्र इति॥ विश्वत्रयेऽत्र राधाषाढत्रये हरौ द्वादश्यां
ऊर्जे हराबुद्धभावे तिथिष्वेवीन दैवते॥ तत्र त्रितिथिषु निद्रादिमाद्रे विश्वत्रये हरौ॥२९७॥ क
न्यायां वासवी द्वौ धोबोधोदुर्गामियोघटे॥ ॥ ॥तथा च ब्रह्मांडपुराणे॥ द्वादश्यां तु सि
तपक्षे मासि प्रोष्ठपदे तथा॥ शक्रमुत्थापयेद्राजा विश्वश्रवणवासवे इति॥२९७॥ बोधयेति
॥ दुर्गा लक्ष्मीः घटे तुलायां॥ अंके नवम्यां॥ अमायां अमावास्यायां॥ तथा च भागवतपु
राणे॥ कन्यायां कृष्णपक्षे तु पूजयित्वार्चयेद्दिवा॥ नवम्यां बोधयेद्देवीं गीतवादित्रनि

का०नि० १५३ स्वनैरिति॥ कन्यायामिति॥ द्विराषाढेनात्र पक्षमाश्रित्योक्तं॥ तथा च गाराहो॥ अमावास्यांतु
लादिभिर्लक्ष्मीनिद्रां विमुंचतीति॥ लक्ष्मीप्रबोधे सा अमावास्यादौ कार्त्तिके याज्ञिके प्रसिद्धा॥
अत्र सर्वत्र कर्कटकादिसंक्रांतिग्रहणे द्विराषाढानि प्रायेण तत्र द्विराषाढो द्विविधः मुख्यः कल्प
श्च॥ यदा आषाढ एवाधिमासो भवति तदा मुख्यः॥ यदा फाल्गुनादिकार्त्तिकांतमासेषु भवति त
दा कल्पो द्विराषाढः॥ तथा हि॥ आषाढीद्वयसंयुक्तं पौर्णमासीद्वयं तथा॥ द्विराषाढः स विज्ञेयः

अंके मार्ग्यंतिथौ एष विधिर्मासमलिम्लुचे॥ ९८॥

विष्णुः स्वपिति कर्कटे इति॥ तथा॥ वैशाखादितुलांतेषु यदि पूर्णाद्वयं भवेत्॥ द्विराषाढः स वि
ज्ञेयः शयनोद्वर्त्तनादिषु॥ वैशाखपादीनि फाल्गुनद्वयस्याप्युपलक्षणमिति निबंधृनिर्व्याख्या
तं तत्र फाल्गुनाषाढांतेषु अधिमाससंपाते कर्कटे हरिशयने सति कन्यायां शक्रोत्थापनप
रिवर्त्तौ॥ तुलायां दुर्गोत्थापनं वृश्चिके हरेरुत्थापनं॥ तथा च विराचितं॥ कर्कटे तु हरौ सु राम १५३

प्ते शक्रध्वजक्रियाश्विने॥ तुलायां बोधयेद्देवीं वृश्चिके तु जनार्दनमिति॥ यदा मिथुनाषाढे ह
रिशयने सति कर्कटादित्रयेपि मासपातः तदा अधिमासे उत्थापनविधिर्नेत्याहुः॥ एष वि
धिरिति॥ तथा चोक्तं॥ शक्रध्वजोत्थापनं च विष्णोश्च परिवर्त्तनं॥ मारद्वये न निर्दिष्टं नापि प
नं देवकोविदैः दुर्गायाश्च त्रिनिमासैरधिमासं विनैव तु॥ अधिमासनिपाते तु क्रमो दिष्टो वि
का हरीन्॥ कन्यातुलावृश्चिकेषु नृपतन्छापयेत् ध्रुवमिति॥ यदाश्चावयाद्वयं नाद्वय
द्वयं वा भवति तदादेवशयनान्मासत्रयेण कन्यायां शक्रोत्थापन विष्णुपरिवर्त्तने॥ तस्मा
न्मासेन तुलायां दुर्गोत्थापनं मासद्वयेन वृश्चिके विष्णोरुत्थापनं॥ यदा आश्विनद्वयं भव
ति तदा सिंहगे शक्रोत्थापनं परिवर्त्तने तस्मान्मासद्वयेन तुलायां दुर्गोत्थापनं॥ मास
त्रयेण वृश्चिके विष्णोरुत्थापनं॥ तदा कार्त्तिकद्वयं भवति॥ तदा कन्यायां दुर्गोत्थापनं
॥ वृश्चिके देवोत्थापनमिति भावः॥ ९८॥

अथ नामकीर्त्तनकालः ॥ अथ सर्वाणि ॥ तथा च मार्कण्डेयः ॥ चक्रिणं हवितेचैव वराहं दंष्ट्रिणं स्व
प्ने तथा ॥ मोक्षार्थी विजयेद्रामं नन्दिक्षु प्राच्यादिषु स्मरेत् ॥ अजितं चाधिकं चैव सर्वं सर्वे
श्वरं एथुं संस्मरेत्तु रूपं भक्त्या व्यवहारेषु सर्वदा ॥ कूर्मं वराहं मत्स्यं वा जलप्रतरणे स्मरे
त् ॥ भ्राजिष्णुमग्निजनने जपेन्नामत्वतन्द्रितः ॥ संग्रामाभिमुखो गच्छन्संस्मरेदपराजितं ॥ वै
श्रवं पुण्डरीकाक्षं युद्धकारवंतपाजयेत् ॥ नेत्रबाधासु सर्वासु हृषीकेशं तथैव च ॥ अच्युतं गोवा

अथ नामकर्मकालः ॥ अथ सर्वाणि नामानि सर्वकार्येषु हरेर्जपेत् ॥ ॥

मृतं चैव जपेदौषधकर्मणि ॥ गरुडध्वजानुस्मरणादापदो मुच्यते नरः ॥ ज्वरदुष्टशिरोरोगं
विषवीर्यं च शाम्यति ॥ नह नक्षत्रपाडासु दैवबाधाटवीषु च ॥ दस्युवैरिविरोधेषु व्याघ्रसिं
हादिसंकटे ॥ अंधकारे तथा तीव्रे नरसिंहेति कीर्त्तयेत् ॥ नारायणं शार्ङ्गधरं श्रीधरं गज
मोक्षणं ॥ वामनं खड्गिनं चैव दुःस्वप्नेषु तु संस्मरेत् ॥ अग्निदाहे समुत्पन्ने संस्मरेज्जलशायिनं ॥

बलभद्रं तु युद्धार्थी कृष्यारंभे हलायुधं ॥ उत्तारणं वणिज्यार्थी श्रीराममभ्युदये नृप ॥ मांगल्ये मं
गलं विष्णुं मांगल्येषु तु कीर्त्तयेत् ॥ अग्निघाते घ्नघोषेषु विशोकेषु तु याजयेत् ॥ उत्तिष्ठन्कीर्त्त
येद्विष्णुं प्रसुप्ते माधवं नरः ॥ भोजने चैव गोविंदं सर्वत्र मधुसूदनं ॥ नारायणं सर्वकालं क्षुत
प्रस्खलनादिषु ॥ स्नाने देवार्चने होमे प्रणिपाते प्रदक्षिणे ॥ कीर्त्तयेद्वासुदेवं च अनुक्तेष्वपि

विशेषो मूलतो ज्ञेयः ॥ ॥ अथ गौणकालः ॥ गौणकालः स्वकालतः ॥ २९ ॥

वादवं ॥ कर्पारंभे तथा राजन्नृपये छं नामकीर्त्तयेत् ॥ सर्वाणि नामानि हितस्य राजन्सर्वा
र्थसिद्धौ हि भवंति पुंसः ॥ तस्माद्यथेष्टं खलु देवतानां सर्वेषु कार्येषु जपेत्तु नक्त्वेति ॥
अथ गौणकालः ॥ गौणकाल इति ॥ मुख्यकालादुत्तरो गौणः ॥ कालइत्यर्थः ॥ तथा चत्रि
काऽयमंडनः ॥ स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मण इति ॥ २९ ॥ ॥ छ ॥

तत्र मुख्यस्याभावे काम्यं न चेति॥ चकारस्तत्रेत्यनंतरं योज्यः मुख्यस्य मुख्यकालस्य यथाक
थंचिदभावे सति॥ तत्र च गौणकालेपि काम्यं न॥ अप्राप्तिसमये नैमित्तिके गौणेपि स्यातामिति
भावः॥ तथा च त्रिकांडमंडनः॥ मुख्यकाले यदावश्यं कर्म कर्तुं न शक्यते॥ गौणकालेपि क
र्तव्यं गौणोप्यत्रेदृशो भवेदिति॥ इदृशो मुख्यकालसदृशः काम्यं तु गौणकाले न कार्यं॥ तथा

उत्तरस्तु वि मुख्यस्याभावे काम्यं न चापवा॥ मुख्यकाले हि संप्राप्ते
गौणमप्यस्तु साधनं॥ मुख्येपि साधने तस्य समयस्य न गौणता॥ ३०॥

चकालनिर्णयिकाराः॥ एतत्र गौणकालग्रहणं न काम्येषु तत्र सर्वेगोप संहाराच्च क्रमेणैवा
धिकारप्रतिपादनादिति॥ अथ मुख्यद्रव्यादिकालाभावेपि मुख्यकालं नातिक्रमेदित्याह
॥ अथवा मुख्यकाले हीति॥ मुख्यकाले साधने द्रव्यादि गौणमप्यस्तु साधने द्रव्ये मुख्येपि
सति तस्य मुख्यसमयस्य गौणता गौणत्वं नास्त्येव भवेदित्यर्थः॥ तथा च त्रिकांडमंडनः॥

मुख्यकालमुपाश्रित्य गौणमप्यस्तु साधनं॥ न मुख्यद्रव्यलाभेन गौणकालप्रतीक्षणमिति॥ ३०॥ प्र
तिज्ञासमये सूचितमर्थांतरप्रयोजनं स्पृष्टसंयन प्रतिज्ञासमाप्तिं दर्शयति॥ दुर्बोधेति॥ दुर्बोध
मतिमतामपि दुःखेन ज्ञातुं शक्यः॥ तथाः कालनिर्णयः॥ तस्य सिद्धांतो नाम्नायेन प्रतिपक्षं निर
स्य व्यवस्थापितार्थः॥ दुर्बोधश्चासौ सिद्धांतश्च तदेव ध्वांतं तिमिरं विशेषेण प्राधान्येन कालध्वांतत्व
श्रेन दुर्बोधत्वमेवोच्यते यतस्तदेव सिद्धसाधप्रकाशानं ध्वांतं तमः दुर्बोधत्वेन सिद्धांतस्य अप्रका

दुर्बोधयत्नेपसिद्धांतध्वांतसंघातजंभिका॥ सुश्लक्ष्णाकारिरामार्यैः कालनिर्णयदीपिका॥ ३१॥

शारूपत्वमिति यावत्॥ तस्य संघातः समुदायः नानाविधप्रकारणस्वत्वात्॥ तस्य जंभिका मर्दिका॥
दुर्बोधत्वंनिवसेन सिद्धांतप्रकाशिकेत्यर्थः॥ एवंभूता अत एव सुश्लक्ष्णा ग्रंथाद्यादिगुणयुक्ता का
लनिर्णयदीपिका रामार्यै रामचंद्राचार्यैः कारि समापितेत्यर्थः॥ अंतर्वर्तिनादीपिकेति पदेनो
पसूचितं दीपिकावदर्थं योपि सर्वजनव्यवहारसिद्धैः सर्वदेशीयै रव्यातन्वाकल्पं नामिति॥ ३१॥

इति विवरणमेतद्दीपिकायाः मयापह्नतमनुसृत्वाकं मायविन्यासगर्भं ॥ स्वमनसदन्नातनूनद्धर्नि
तानेकभावं सुजनजनमनस्तद्दीक्ष्यवैलक्ष्यतेनु ॥ ५ ॥ श्रीरामस्वामीनामा रघुपतिरकारो मंत्रशास्त्रे
निषेके यस्याचार्यानिधांचस्वयनदितनतोतातसर्वागमार्थः ॥ यश्चक्रे पंचरात्रागमहृदयमयं
वह्ननानात्र यं स्तोनं ताचार्यः कुलेत्राम यतु दुरितं मे विमुक्तायसूनुः ॥ रामसुश्रीन्नासेवानरणादि
बुधगणानंदियोन्मायपुक्तं भाष्यं सारं श्रुतीनामहृन्नतृपसनेवादिवृंदं विजित्य ॥ गोपालाचार्य

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीगोपालगुरुपूज्यपादशिष्यश्रीरामचंद्राचार्यकृताका
लनिर्णयदीपिका समाप्ता ॥ ॥ शुभं भवतु ॥ सुखाम्भुतनत्विरमव यस्य सोस्मान्नृसिंहाचार्योया
कूल्यवृत्तिं मम वनिसतं तं यस्य गोत्रं पवित्रं ॥ ३ ॥ नलन्नयात्रनूतोनिगमनयमुरवा बृंदज्ञानां
गिरांयोम्नाकूल्यां सत्रवर्त्तिसदसि नरयनेः सदधो रामनाम्नः ॥ यस्या नूतौ सुतौ द्वौ अजकु राम॰ १५६
धनिलकौ श्रीनृसिंहार्यरामाचार्यावेवै सोवतान्नो निजजनसुखकृल्लक्ष्मआचार्यवर्यः ॥ ४ ॥

तसुएपानां फलं यः सुतसनयमम्नवतन्त्वानृन्नक्तिप्रसक्तो गोपालाचार्यदीक्षाक्षपितकलिम
लोनेकविद्याविदग्धः ॥ विख्याताः सर्वविद्वत्सदसि बहुविधा यस्य नेते प्रबंधाः ॥ सोंतवाणि
मणाप्योममम नसि सदावर्त्ततां रामचंद्रः ॥ ५ ॥ तस्मै दृप्मान्नपुत्रः परिकलितकलः श्रीगु
रो रामचंद्रात् काव्यानां येन टीका व्यरचि सकरूणांभोनिधिर्नृसिंधुः श्रीरूष्णाचार्य
संतो गुरुरयमवतात् मां कृपांप्राप्य यस्य श्रीरामाचार्यसूनुः विवरणमकरोद्दीपिका
यां नृसिंहः ॥ ६ ॥ ॥ इति श्रीमत्सर्वतंत्रस्वतंत्रसकलसदागमाचार्यपरमहंसपरि
व्राजकश्रीगोपालगुरुपूज्यपादप्रियशिष्यश्रीरामचंद्राचार्यसुतश्रीनृसिंहाचार्यवि
रचितं कालनिर्णयदीपिकाविवरणं समाप्तं ॥ ॥ छ ॥ ॥ शुभं भवतु ॥ ॥ श्रीरस्तु ॥
कल्याणमस्तु ॥ ॥ ॥ श्रीरामाय नमः ॥ ॥ श्रीकृष्णाय नमः ॥ ॥ रामयन ॥

॥कालनिर्णयदीपिकासमाप्ता॥ श्रीरामायनम॥